Subject- Sanskrit (2nd SEM Programme)

Course code- APSNS 201C-1B

Course Title- Sanskrit Poetry and Metre.

Course Topic- Raghuvaṃśam(Canto-1)

**न किलानुययुस्तस्य राजानो रक्षितुर्यशः।**

**व्यावृता यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता।।27।।**

श्लोकोऽयं कालिदासेन विरचितं रघुवंशं महाकाव्यस्य प्रथमसर्गात् गृहीतः।

न किलोति राजानः अन्ये नृपा रक्षितुर्भयेभ्यस्त्रातुस्तस्य राज्ञो यशः न अनुययुः किलः न अनुचक्रुः खलु। कुतः , यद् यस्मात् कारणात् तस्करता चौर्यं परस्वेभ्यः परधनेभ्यः व्यावृता सती, श्रुतौ वाचकशव्दे स्थिता प्रवृत्ता।अपहार्यान्तराभ्यावात् तस्करशव्द एवापहृत इत्यर्थः। अथवा "अत्यन्त सत्यपि ह्यर्थे ज्ञानं शव्दः करोति हि" इति न्यायेन शव्दे स्थिता स्फुरिता, न तु स्वरूपतोऽस्तीत्यर्थः।